त्रयोदशः पाठः

# शुकेश्वराष्टकम्

सनातनं पुरातनं परोपकार-साधनम्,
जनस्य कामपूरकं मनोजगर्वखर्वक्रम्।
शुकेश्वरं नमाम्यहं शुकेश्वरं नमाम्यहम्
शुकेश्वरं नमाम्यहं शुकेश्वरं नमाम्यहम्॥

जगत्तमोविनाशकं सदाऽव्ययप्रदायकम्
सदाशयं सहायकं, सदाशिवं सुनायकम्। शुकेश्वरं ......

सतां सदा सुरक्षकं, दुराशयप्रबाधकम्
भजन्मनोविहारिणं, सदारिवृन्दपीडकम्। शुकेश्वरं ......

उमापतिं सतीपतिं, नमामि तं महागतिम्
नमामि कालिकापतिं, नमामि तारिकापतिम्। शुकेश्वरं ......

जटायुतं त्रिलोचनं त्रिमार्गगार्द्रमस्तकम्
गजस्य चर्मधारिणं त्रिशूलशस्त्रधारिणम्। शुकेश्वरं ......

नवेन्दुना सुभोभितं सुदिव्यपुष्पपूजितम्
मयूरगीततोषितं, सुभक्तिगीतकीर्तितम्। शुकेश्वरं ......

जलप्रियं महेश्वरं कृषेः फलप्रदायकम्
जनेश्वरं शुकेश्वरं, सुभूमिनित्यपालकम्। शुकेश्वरं ......

सुबोधदं सुभक्तिदं सुभुक्तिमुक्तिदायकम्
चतुष्फलप्रदायकं, विशालमूर्धधारकम्। शुकेश्वरं ......

इदं शुकेश्वराष्टकं तु वैद्यनाथकीर्तितम्
पठन्नरः सभक्ति यः, शिवो ददाति वाञ्छितम्। शुकेश्वरं ......

## अभ्यासः

1. "मनोजगर्वखर्वकः" कः?
2. अस्य पाठस्य सरलार्थं लिखत।

★★★